# Chapter 9

## bihar board class 10th sanskrit solutions स्वामी दयानन्दः

**अभ्यासः**

मौखिक

1 . स्वामिनः दयानन्दस्य विषये द्वे वाक्ये वदत । उत्तरम्- स्वामिनः दयानन्द एक : महान् समाजसुधारकः आसीत् । स : आधुनिक भारतवर्षे समाजसेवा शिक्षायाश्च महान् उद्धारकः आसीत् ।

**2 . अधोलिखितानां समस्तपदानां विग्रहं वदत –**
धर्माद्धारकः , सत्यान्वेषी , वैषम्यनिवारक :, शिखरस्थानीयः , संस्कृतशिक्षा

उत्तरम्- धर्मोद्धारक : -धर्मस्य उद्धारकः ।
सत्यान्वेषी – सत्यस्य अन्वेषी ।
वैषम्यनिवारकः – वैषम्यस्य निवारकः ।
शिखरस्थानीयः – शिखरे स्थानीयः ।
संस्कृतशिक्षा – संस्कृतस्य शिक्षा ।

**3 . सन्धिविच्छेदं कुरुत –**
संकल्पाच्च , धर्मान्तरम् , समाजोद्धरणस्य , सत्यान्वेषिणः , विग्रहार्पितानि
उत्तरम्- संकल्पाच्च- संकल्पात् + च ।
धर्मान्तरम् – धर्म + अन्तरम् ।
समाजोद्धरणस्य – समाज + उद्धरणस्य । सत्यान्वेषिणः – सत्य + अन्वेषिणः ।
विग्रहार्पितानि – विग्रह +अर्पितानि ।

**4.पञ्च अव्ययपदानि वदत ।**
उत्तरम्- यथा , तथा , सम्प्रति , च , शीघ्रम् ।

**लिखितः 1 . अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत**
(क)मध्यकाले काः भारतीयं समाजम् अदूषयन् ?
(ख)के हिन्दुसमाज तिरस्कृत्य धर्मान्तरणं स्वीकृतवन्तः ?
( ग) स्वामिनः दयानन्दस्य जन्म कुत्र अभवत् ?
( घ ) विग्रहार्पितानि द्रव्याणि के भक्षयन्ति ?
(ङ)रात्रिजागरणं विहाय मूलशङ्करः कुत्र गतः ?

**उत्तरम्**– ( क ) मध्यकाले कुत्सितरीतयः भारतीय समाजम् अदूषयन् ।
( ख ) दलिता : हिन्दुसमाज तिरस्कृत्य धर्मान्तरणं स्वीकृतवन्तः ।
(ग)स्वामिनः दयानन्दस्य जन्म गुजरातप्रदेशस्य टंकरानामके अभवत् ।
( घ ) विग्रहार्पितानि द्रव्याणि मूषकाः भक्षयन्ति ।
(ङ)रात्रिजागरणं विहाय मूलशङ्करः गृहं गतः ।


https://www.evidyarthi.in/

**2 . निम्नलिखितानां पदानां सन्धिविच्छेदं कुरुत –**

एवाध्ययनस्यास्य , विग्रहमारुहा , वर्षेऽभूत , स्वजीवनमसावर्पितवान् , समाजोद्धारकैः , विद्यालयानाञ्च ।

उत्तरम्- एवाध्ययनस्यास्य- एव + अध्ययनस्य + अस्य ।

विग्रहमारुह्य – विग्रहम + आरुह्य ।

वर्षेऽभूत् – वर्षे + अभूत् ।

स्वजीवनमसावर्पितवान् – स्वजीवनम् – असौ + अर्पितवान् ।

समाजोद्धारकैः – समाज + उद्धारकैः । विद्यालयानाञ्च – विद्यालयानम् + च ।

**3.अधोलिखितवाक्येषु कोष्ठात् समुचितं पदमादाय रिक्तस्थानानि पूरयत –**

(क)स्वामी दयानन्दः .... आसीत् । ( समाजोद्धारकः / कृषक

(ख)बालकस्य नाम ......... इति कृतम् । ( मूलविष्णुः । मूलशङ्करः )

( ग ) शङ्करस्य विग्रहमारुहा ....... विग्रहार्पितानि द्रव्याणि भक्षयन्ति । ( खगाः / मूषकाः )

(घ)रात्रिजागरणं विहाय मूलशङ्करः .......... गतः । ( गृहम् / विद्यालयम् )

( ङ ) स्वामी दयानन्दः संस्थापकः आसीत् । ( आर्यसमाजस्य / सिखसमाजस्य )

**उत्तरम्-**

( क ) स्वामी दयानन्दः समाजोद्धारकः आसीत् । ( ख ) बालकस्य नाम मूलशङ्करः इति कृतम् । (ग)शङ्करस्य विग्रहमारुह्य मूषकाः विग्रहार्पितानि द्रव्याणि भक्षयन्ति ।

( घ ) रात्रिजागरणं विहाय मूलशङ्करः गृहम् गतः । ( ङ ) स्वामी दयानन्दः आर्यसमाजस्य संस्थापकः आसीत् ।

**4 . निम्नलिखितानां पदानां प्रकृतिप्रत्ययविभागं कुरुत-**

दर्शयित्वा , विरच्य , परित्यज्य , स्मरणीयम् , दृष्टम् , कृतम् , गतः

उत्तरम्

दर्शयित्वा=दृश् णिच् + क्त्वा

विरच्य =वि + रच् + ल्यप्

परित्यज्य =परि + त्यज् + ल्यप्

स्मरणीयम्=स्मृ + अनीयर्

दृष्टम् =दृश् + क्त

कृतम्= कृ + क्त

गतः =गम् + क्त

**5 . कोष्ठकस्थेभ्यः धातुभ्यः उचितप्रत्ययं योजयित्वा रिक्तस्थानानि पूरयत –**

( क ) प्राचीनसमाजे अनेके दोषाः ....... ( अस् )

(ख)तस्य जन्म 1824 ईस्वी वर्षे....... । ( भू ) (ग)बालकस्य नाम मूलशङ्करः इति ........... I ( कृ ) (घ)दयानन्दस्य योगदानं सदा ...........। ( स्मृ )

( ङ ) ततः मूलशङ्करे वैराग्यभावः ........ । ( गम् ) उत्तरम्- ( क ) प्राचीनसमाजे अनेके दोषा : आसन् । (ख)तस्य जन्म 1824 ईस्वी वर्षे अभूत् ।

(ग)बालकस्य नाम मूलशङ्करः इति कृतम् ।

( घ ) दयानन्दस्य योगदानं सदा स्मरणीयम् ।

( ङ ) ततः मूलशङ्करे वैराग्यभावः समागतः ।


https://www.evidyarthi.in/

**6 . अधोलिखितानां पदानां संस्कृतवाक्येषु प्रयोगं कुरुत –**
मूषकः , विद्वान , धर्मोद्धारकः , अगच्छत् , सह
उत्तरम्-
मूषक : गृहे मूषक : धावति ।
विद्वान् – देवदत्तः विद्वान् आसीत् ।
धर्मोद्धारक : -स्वामी दयानन्दः धर्माद्धारकः आसीत् । अगच्छत् – उमेश : विद्यालयात् गृहं अगच्छत् ।
सह – रामेण सह सीताऽपि वनं गतवती ।

**7 . निम्नलिखितानां पदानां विपरीतार्थकपदानि लिखत –**
विद्वान् , दोषः , पराजितः , अनास्था , उपकारम् , प्रारम्भः , गर्हितः , वैषम्यम्

**उत्तरम्-**
विद्वान् – मूर्खः ।
दोषः – गुणः ।
पराजितः – विजितः ।
अनास्था- आस्था ।
उपकारम् अपकारम् ।
प्रारम्भ : -समाप्तिः ।
गर्हितः – प्रशंसितः ।
वैषम्यम् साम्यम् ।

**8 . अधोलिखितेषु पदेषु धातुयुक्तम् उचितं प्रत्ययं निर्दिशत –**
(क)गत : – गम्...............( घञ् । क्तः )
(ख)गत्वा- गम् +............... ( ल्युट् । क्त्वा )
( ग ) गमनीयम् -गम् + ............... ( अनीयर् / ल्यप् )
( घ ) उपगम्य -गम् + .............. ( ल्यप् / क्त्वा ) ( ङ ) गन्तुम्- गम् + ............... ( यत् / तुमुन् ) उत्तरम्- ( क ) गत :- गम् + क्तः
(ख) गत्वा-गम् + क्त्वा
( ग ) गमनीयम्- गम् + अनीयर
(घ) उपगम्य -गम् + ल्यप्
(ङ)गन्तुम्- गम् + तुमुन्

**9 . अधोलिखितानि रेखाङ्कितपदानि बहुवचने परिवर्तयत**
( क ) स : ग्रन्थं विरच्य महान्तम् उपकारम् अकरोत् । (ख)सः प्राचीनशिक्षायां दोषमः अदर्शयत् ।
( ग ) स : गृहम् अपश्यत् ।
(घ)तत्र देवः पूजितः ।
(ङ)सः खगं पश्यति ।
**उत्तरम्**– ( क ) ग्रन्थानि
(ख)दोषाः
(ग) गृहाणि
(घ) देवाः , पूजिताः
(ङ) खगान्


https://www.evidyarthi.in/

**10 . अधोलिखितं रेखाङ्कितपदमनुसृत्य प्रश्ननिर्माणं कुरुत –**
( क ) मध्यकाले धर्मकार्येषु आडम्बर : आसीत् । ( ख ) तत्र विधवानां स्थितिः गर्हिता अस्ति ।
( ग ) बालकस्य नाम मूलशङ्करः आसीत् ।
( घ ) मूलशङ्करः मेधावी आसीत् ।
( ङ ) आर्यसमाजस्य शाखा : देशे विदेशेषु च वर्तन्ते । (च)मूलशङ्करस्य मूर्तिपूजां प्रति अनास्था जाता ।
(छ) गृहं परित्यज्य स : गतः ।

**उत्तरम्-**
( क ) मध्यकाले केषु आडम्बरः आसीत् ?
तत्र विधवानां स्थितिः का अस्ति ?
( ग ) कस्य नाम मूलशङ्करः आसीत् ?
(घ)क : मेधावी आसीत् ?
(ङ)कस्य शाखा : देशे विदेशेषु च वर्तन्ते ?
(च)मूलशङ्करस्य का प्रति अनास्था जाता ?
(छ)किम् परित्यज्य स : गतः ?

**11 . अधोलिखितेषु पदेषु प्रयुक्तां विभक्तिं लिखत – सत्यान्वेषिणः , विधवानाम् , विषमे , धर्मोद्धारकाः , तेषु , प्रतिमायाम , वैदिकधर्मस्य , संस्कृतेन ।**
उत्तरम्- सत्यान्वेषिणः- प्रथमा ( बहुवचन )
विधवानाम् – षष्ठी ( बहुवचन )
विषमे — सप्तमी
धर्माद्धारका : -प्रथमा ( बहुवचन )
तेषु सप्तमी ( बहुवचन )
प्रतिमायाम् सप्तमी ( एकवचन )
वैदिकधर्मस्य – षष्ठी ( एकवचन )
संस्कृतेन – तृतिया ( एकवचन )


https://www.evidyarthi.in/